National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 390-394
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Jagadish Naskar**
Assistant Professor in Sanskrit,
Government College of Education,
Banipur,

**Dr. Subham Mukhopadhyay**
Sanskrit Senior Lecturer,
Sri Vidyaniketan PUC College,
Karnataka,

**Correspondence:**
**Dr. Jagadish Naskar**
Assistant Professor in Sanskrit,
Government College of Education,
Banipur,

# महाकवि-अवस्थीबच्चूलालप्रणीते अगतिकगतिकमित्यस्मिन् खण्डकाव्ये सामाजिकचिन्तनम्

**Dr. Jagadish Naskar, Dr. Subham Mukhopadhyay**

**सारांशः –**

रसिकानां रसास्वादनाय प्रमुखसाधनं काव्यम्। यद्यपि काव्यस्य बहवः प्रकाराः वर्तन्ते तेषु खण्डकाव्यम् एकादेशानुवर्तिकाव्यं भवति। संस्कृतकाव्येषु खण्डकाव्यानामुच्चस्थानं वर्तते। महाकविना ज्ञानोपाह्वोऽवस्थीवच्चूलालमहोदयेन विरचिता प्रतानिनी इति विविधविषयिणी प्रत्यग्रकाव्य-सङ्कुलना१९९६ ई.वर्षे वैजयन्तप्रकाशनडलाहालादद्वारा प्रकाशिता। अस्यां सङ्कलनायां पञ्च प्रतानाः दृश्यन्ते। तत्र चतुर्थे विरागप्रताने **अगतिकगतिकमिति** खण्डकाव्ये १५३ छन्दोबद्धानि पद्यानि हृद्यानि विद्यन्ते। महाकविः अस्मिन् खण्डकाव्ये स्पष्टतया प्रदर्शयति यथा शरीरं विना धर्मपालनं न सम्भवति। महाकवेः कालिदासस्य, शरीरमाद्यं खलु धर्मसाधनम् इत्युक्तेः प्रभावोऽप्यत्र दृश्यते। काव्यमिदं सौन्दर्यशास्त्रदृष्ट्या सकलसहृदयहृदयग्राह्यं भवति। अस्मिन् खण्डकाव्ये समाजस्य विविधाः समस्याः, मानवजीवनस्य संघर्षः, नैतिकमूल्यानां ह्रासः, सामाजिकविषमता, दारिद्र्यम्, अन्यायः, शोषणम्, मानवीयसंबन्धानां परिवर्तनं च प्रभावकरूपेण निरूपितानि सन्ति। कविना समाजस्य यथार्थस्थितेः संवेदनशीलं चित्रणं कृत्वा सामाजिकजागरणस्य, मानवीयमूल्यानां संरक्षणस्य, समत्वस्य, न्यायस्य तथा लोककल्याणस्य आवश्यकता प्रतिपादिता अस्ति।

अस्य अध्ययनस्य प्रमुखोद्देश्यं खण्डकाव्ये अन्तर्निहितानां सामाजिकमूल्यानां, समसामयिक-सामाजिकसमस्यानां तथा तासां समाधानसम्बद्धदृष्टेः विश्लेषणम् अस्ति। अत्र वर्णनात्मक-विश्लेषणात्मकपद्धत्या काव्यस्य सामाजिकपक्षः परीक्षितः अस्ति। अध्ययनस्य निष्कर्षरूपेण ज्ञायते यत् 'अगतिगतिकम्' केवलं साहित्यिककृतिरूपेण न, अपितु सामाजिकचेतनायाः, मानवीयसंवेदनायाः तथा समाजसुधारस्य प्रभावशाली माध्यमरूपेण अपि प्रतिष्ठितम् अस्ति। अतः एतत् खण्डकाव्यं सामाजिकदायित्वबोधस्य, नैतिकमूल्यानां तथा मानवतावादस्य सुदृढप्रतिपादकं काव्यमिति प्रतिपाद्यते।

**कूटशब्दाः** - प्रतानिनी, खण्डकाव्यम्, अगतिकगतिकम्, मानवीयसंबन्धम्, सामाजिकमूल्यम्, नैतिक-मूल्यम्, दारिद्र्यम्, अवस्थीवच्चूलाल ।

**भूमिका** - विदितमेव विदुषां यत्-

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**
**वेदतत्त्वार्थसञ्जुष्टं लोकालोककरं शिवम्।।**

संस्कृतकाव्यस्योदयो यद्यपि प्रशान्ततपोवनेऽजायत तथापि तस्य प्रादुर्भूतकाव्यसम्पदः विकासो राजप्रासादेष्वेव जातः। विक्रमादित्यं विना कालिदासस्य, हर्षवर्धनं विना वाणभट्टस्य कविप्रसिद्धेः सम्भवो नासीत्। कविसमादरकर्तारः राजानः तान् कवीन् उत्तमकाव्यनिर्माणाय प्रेरयन्। राज्ञामाश्रये कवित्वं प्रस्फुटति स्म। राज्ञामेव रङ्गशालासु तेषां कृतयः सम्मानीयन्ते। राज्ञामाश्रयमवाप्येव संस्कृतकाव्यं सर्वतोमुखिनं विकासमभजत।

**काव्यस्य परिभाषा–**

विशालोऽयं संस्कृतसाहित्यस्य वाङ्मयः। दृश्यश्रव्यचम्पूनामभिः बहुभेदानि काव्यानि वाङ्मयेऽस्मिन् दृश्यन्ते। दृश्यश्रव्यत्वभेदेन काव्यं द्विधा विभाज्यते इति सम्प्रदायः। तदेव सम्प्रदायानुगुणं विश्वनाथः साहित्यदर्पणे ब्रवीति यत् -

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्**[1]

पुनश्च दृश्यकाव्यस्य नैकाः विभागाः समभिलोक्यन्ते। नाटकाख्ययि-कानाटिका इत्यादयः भवन्ति। तथैव श्रव्यकाव्यस्यापि नैकाः अंशाः समावलोक्यन्ते। ते च यथा – गद्यपद्यचम्पू इत्यादयः इति। एतेषु सर्वेषु अन्ये केचन अंशाः विद्यन्ते ये अंशाः स्तोत्रकाव्यं गीतिकाव्यमित्यदिभिः पदैः व्यपदिश्यन्ते।

काव्यम् इति शब्दः तावत् **कवृ वर्णने** इत्यस्माद्धातोः **कवेर्यत्** इत्यनेन सूत्रेण अच्प्रत्यये काव्यम् इति पदं निष्पन्नं भवति। काव्यविषये अग्निपुराणे महर्षणा व्यासदेवेनापि भणितं यथा –

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**

**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**[2]

**खण्डकाव्यस्य लक्षणम्**

रसिकानां रसास्वादनाय प्रमुखसाधनं काव्यम्। यद्यपि काव्यस्य बहवः प्रकाराः वर्तन्ते तेषु खण्डकाव्यम् एकादेशानुवर्तिकाव्यं भवति। तत्र खण्डकाव्यस्य लक्षणं यथा –

**खण्डकाव्यं भवेत् काव्यस्यैकादेशानुसारि च**[3] एवम् उत्कलदेशीया-लङ्कारिकः गोपीनाथकविभूषणः कविचिन्तामणिग्रन्थे खण्डकाव्य-स्येवं लक्षणं कृतवान् यथा –

**सर्गबन्धविहीनञ्च शून्यं चन्द्रादिवर्णनैः।**

**श्लोकसंख्यात्मकं यत्तत् खण्डकाव्यमिति स्मृतम्।।**[4]

खण्डकाव्यं हि मुख्यतया चतुर्विधं दृश्यते यथा – शाङ्र्गरिकं धार्मिकं नैतिकं साङ्ग्राहिकञ्च। प्रथमो भेदः गीतिप्रभृतिभिः विविधो वर्तते। द्वितीयो भेदः स्तुतिकाव्यम् एव। तृतीयस्तु नीतिपरकः वोपदेशपरक अनुक्तिरूपश्च। चतुर्थभेदस्तु सङ्ग्रहपरकः सुभाषितसङ्ग्रहः कोषश्चास्य भेदौ। यत्र कुत्रापि तु सर्वेषामेव पक्षाणां मिश्रणमपि दृश्यते।

**खण्डकाव्यस्योत्पत्तिः**

यद्यपि लौकिकसाहित्ये खण्डकाव्यस्य रचना कालिदासेनैव कृता तथापि नैतावता तस्य तस्मादपि प्राचीनतरत्वं विद्वत्परम्परायां मन्यते। ऋग्वेदेऽपि खण्डकाव्यस्य स्वरूपम् उपलभ्यते। कमनीयार्थद्योतकं वाक्यमेव भवति काव्यम्। यत्र हि किञ्चिदपि वाक्यं तथारूपेणोपन्यस्तं भवति, तत्र खण्डकाव्यस्य विषय उत्पद्यते एव। तेन हि वाक्यस्य काव्यत्वे तद्वदन्तरतत्वमेव हेतुर्न तु बाह्यम्। वाक्यादौ वा एवमेवापि वाक्यं काव्यं भवति यदि तत्कमनीयमर्थं प्रकाशयति।

हंसराजप्रभृतयः समालोचकाः खण्डकाव्यं पञ्चविधं मन्यन्ते। यथा सूक्तमयं भक्तिरसमयम् ऐतिहासिकं रुपकान्तर्गतं सङ्कीर्णञ्च। तेषु हि वेदेषु समुपन्यस्तं सूक्तमयं यथा उषःसूक्तम् भक्तिरसमयं यथोपनिषत्सु वौद्धादिग्रन्थेषु च ऐतिहासिकं यथा रामायणे महाभारते प्रस्तुतं प्रकृतिवर्णनम्, रूपकान्तर्गतं यथा रूपकान्तरूपस्थापित-पद्यानि, सङ्कीर्णञ्च शृङ्गारप्रधानं मेघदूतादिकमिति।

**कविपरिचितिः**

उत्तरप्रदेशे बाराबङ्कीजनपदे **रनजीतपुर**नामको एकः ग्रामः अस्ति। तत्र अवस्थिमहोदयस्य पितामहः पं बैजनाथोऽवस्थी न्यवसत्। सः चार्थकृच्छ्रेणभावेन पीडितो बभूव। भाग्यचक्रेण कालक्रमे निर्धनतादशायाम् अवस्थिनः पितामहः परिवारेण साकं **बहराइच** (उत्तरप्रदेश) फरुहाघाटनामके स्थानमनावृतक्षेत्रं गृहीत्वैकस्मिन् पर्णकुटीरे कालं यापयामास। तदा आचार्यावस्थिनः प्रादुर्भावस्य प्रायः एकवर्षात्प्राक् सन् 1917 ईसवीये तदानीमाचार्यऽवस्थिनो माताऽन्तर्वर्ती बभूव। तस्य रक्षणव्यावस्थायै कुटीरमभितः पटवेश्म निर्मितम्। तस्मिन् पटवेश्मनि श्रावणमासस्य शुक्लपक्षे द्वितीयातिथौ गुरुवासरे संवत् 1975 वि.(1918) ई.वर्षे अगस्तमासस्य अष्टमे दिने आचार्योऽवस्थी भुवमवततार। सर्वे तं शिशुं वर्षद्वयं **भैया** इति सम्बोधयामासुः। तस्य पिता वदरीप्रसादावस्थी, पितामहः वैजनाथावस्थी। पितामहस्य अनुज्ञाप्रदानेन भागवत्कथावाचक-प्रसङ्गतः **वच्चूपण्डितः** इति नाम्नो बच्चूलाल इति नाम कृतम्।

**अगतिकगतिकम् इति खण्डकाव्यस्य प्रतिपाद्यविषयः**

समकालिकसंस्कृतसाहित्ये महाकविना ज्ञानोपाह्वोऽवस्थीवच्चूलाल-महोदयेन विरचिता प्रतानिनी इति विविधविषयिणी प्रत्यग्रकाव्य-सङ्कुलना१९९६ ई.वर्षे वैजयन्तप्रकाशनडलाहालादद्वारा प्रकाशिता। अस्यां सङ्कलनायां पञ्च प्रतानाः दृश्यन्ते। तत्र प्रथमे स्तवकप्रताने चतुर्दशकविताः विलसन्ति। द्वितीये अन्योक्तिप्रताने त्रयोदशपद्यानि सन्ति। तृतीये गजलगीतिप्रताने ६६ गजलगीतानि मनोहराणि सन्ति। चतुर्थे विरागप्रताने **अगतिकगतिकमिति** खण्डकाव्ये १५३ छन्दो-बद्धानि पद्यानि हृद्यानि विद्यन्ते। पञ्चमे प्रकीर्णप्रताने विविधसन्दर्भमधिकृत्य ३७ पद्यानि दृश्यन्ते। ग्रन्थस्य अस्य प्रस्तावनाभागे आचार्याः अभिराजराजेन्द्रमिश्रमहोदयेन लिखितम् –

**वस्तुतः प्रत्येकं प्रतानः स्वतन्त्रग्रन्थकल्पः प्रतिभाति कलेवरदृष्ट्या।**

**प्रस्थानदृष्ट्या च भामिनीविलासायते काव्यसंग्रहोऽयम्।।**[5]

अस्मिन खण्डकाव्ये १५३ विविधछन्दोभिः रचितानि दृश्यन्ते, महान् शिवभक्तोऽयं महाकविः काव्यारम्भे काव्यान्ते च उज्जयिन्यां पूज्यमानं महादेवं महाकालं सर्वथा स्मरति। तत्र मङ्गलपद्यं यथा –

**गङ्गा यस्य कपर्दमन्ववसिता तापत्रयोन्मूलिनी येनोद्धूलित-लालितं च भसितं प्रेतावनेः पावनम्।**

**यस्मिन् विश्वविषेण सार्धमशिवा आशीविषा भूषणं तद् रूपं पशुपाशयोरनुगतं पत्युः पशूनां श्रये।।**[6]

महाकविः अवस्थी बच्चुलालः स्वात्मानं मन्दः इति सूचयन् भगवतः हरसिद्धेः कृपया काव्यं रचयितुं प्रारभते। संसारे विषाक्तमनसां जनानां प्रतिबोधनाय खण्डाकाव्यस्य कथाप्रसङ्गे तेन प्रस्तूयते –

**संसाररीतिरखिलापि मृषेति कृत्वा निह्नूयतामिति यतः स्फुरति प्रयासः**

**तस्माद् विषाक्तमनसां प्रतिबोधनाय प्रस्तूयते विशद एष कथाप्रसङ्गः।।**[7]

भवदत्तः नाम कश्चित् ब्राह्मणः चर्मण्वतीनदीतटे तृणालयेषु वसतिश्चक्रे। तस्य जाया पतिव्रतपरायणा तथा पुत्रश्च विद्वान् आसीत्। तस्य गृहे सवत्सा धेनुरपि आसीत्। एतैः सः शुक्लयजुर्वेदस्य माध्यन्दिनशाखाध्यायी द्विजः विधिपूर्वकं सारस्वतं व्रतमाचरन् सुखेन कालं यापयति स्म।

वस्तुतः वेदविद्यावतां प्रतिभावतां च कृते यश्चलालक्ष्मी निर्धनत्वं सम्पादयतीति महाकविः खेदं प्रकटयति। अतः अध्यापनादिब्राह्मण-कर्मसम्पादनेन समुपलब्धेन धनेन भवदत्तभावः सन् सुखेन कालमनयत्।

**आयाति याति चपला चपलेव लक्ष्मीस्तां लौकिका विमतयो बहु मानयन्ति।**

**ये छान्दसे महिमनि प्रतिभानभाजोनादीनवं सृजति तान् प्रति निर्धनत्वम्।।**[8]

भवादृशः कोऽपि सखा उज्जयिन्यां माघस्य पूर्वदिवसे मासं यावत् यागानुष्ठानमारब्धावान्। तस्मिन् यागकर्मणि भागग्रहणाय सः समाकृष्टः। तत्र गन्तुं भवदत्तः स्वभार्याया सह एकान्ते परामर्शमकरोत्। तत्र महाकविः दाम्पत्यसुखस्य साफल्यं सूचयति।

कविना तदीयं दारिद्रं प्रसङ्गेस्मिन् समुपस्थापितम्। लोके धनहीनेन जनेन साकं सम्वन्धिनोऽपि कथं व्यवहरन्ति इति चारुचित्रितं यथा –

**सम्बन्धिनोऽपि सुहृदोऽपि च पश्यतो मे तूर्ष्णीं विलोक्य मिषतो रहयन्ति गेहम्।**

**मानोन्नतं विदलितं किल काण्डशेषं सौगन्धिकं न समया भ्रमरा भ्रमन्ति।।**[9]

अतः भवदत्तस्य भार्या तत्र गमनाय न्यषेधत्। कारणमपि महाकविः अवस्थीवच्चूलालः सूचितवान् -

**सानुव्रता व्रतपथाञ्च्यवमानवाचो भार्तुर्मतं चरितबाह्यमिति न्यषेधत्।**

**ओजस्विता न वहते महिमापहानं तेजस्विता न सहते तिमिरेण सख्यम्।।**[10]

भगवति परमात्मनि प्रीत्या एव परमं धनमिति पूर्वं भवदत्तस्य शुद्धभावना आसीत्। किन्तु लोभेन स एव अद्य प्रतारितः। कारणं जनाः धनलोभेन सम्प्रति अकार्यं कर्तुं प्रवृत्ताः।

ब्राह्मणः भवदत्तः धनं प्राप्तुं मधुरञ्च खादितुं यजमानगृहेषु कथं गच्छति इति तदानीन्ततं चित्रं परिकल्पितमत्र यथा -

**प्राप्तुं प्राणान् मृदुलशष्कुलिकाश्च भोक्तुं काम्यव्रतेषु यजमानगृहेषु कामात्।**

**चदम्यमाणमनसां विबुधब्रुवाणां श्रेण्यो मुदा भ्रमरिका इव विभ्रमन्ति।।**[11]

एवञ्च भगवान् धनिनां गृहेषु वन्दीकृतः वर्तते। वेदाध्यायी निर्धनः स्वधर्म निरतः स्वगृहे सुखेन वसति। सः कदापि कुलव्रतकृतं सुकृतं न जहाति। अस्मिन् प्रसङ्गे महाकविना उक्तम् यथा –

**विप्रः श्रुतेषु पठिती विदिती स्वधर्मे गेहे सुखं वसति निर्धनतां वृणीते।**

**न त्वात्ममानमवमत्य विडम्बनासु भ्राम्यन् कुलव्रतकृतं सुकृतं जहाति।।**[12]

एवं रुपेण भवदत्तस्य भार्या यागकर्मणि लोभेन धनार्जनाय न्यवारयत्। अनन्तरं सा पत्युः महाकालदर्शनाभिलाषं ज्ञात्वा तत्र गन्तुमङ्गीकृतवती। ततः सः भवदत्तः कुज्झटिकावृतेऽपि प्रातः काले गृहात् प्रस्थितः। मार्गे भोजनार्थं ब्राह्मणी ब्राह्मणं शङ्खालुकं स्थापितवती।

ब्राह्मणः परिचितमार्गेण गतः सः ब्राह्मणः कियद्दुरे चतुष्पथे दिग्भ्रान्तः सन् राजमार्ग परित्यज्य वनमार्गं प्रविष्टः भवति।सः ब्राह्मणः क्रमशः गत्वा शिप्रानदीतटे गवां सरणिं विलोक्य निकटे कश्चित् ग्रामः भवेदिति अचिन्तयत्। अत्यन्तं श्रान्तः वनमार्गे खिन्नः सन् अपि अग्रे चलन् सः ब्राह्मणः दूरात् अग्नेः किरणान् ददर्श। तत्र गच्छन् श्मशानभूमेः भयङ्करं दृश्यं विलोक्य आतङ्कितः। प्रचण्डे शीतकाले अग्नेः निकटे धैर्येण स्थितवान्। तत्र महाकविः प्रेतभूमेः वास्तविकं चित्रमपि समुपस्थापयति यथा –महाकविः द्वादशपद्यैः प्रेतावनेस्य वर्णनं चकार। तत्र भवदत्तः सपदि भगवन्तं शङ्करमूर्तिं दृष्ट्वा साष्टाङ्गपातविधिना प्रणमामः। श्मशानभूमौ भगवन्तं कृतकृत्य अभवत्। तत्र क्षुधातुरः ब्राह्मणः श्मशाने चितायाः निचितेषु अङ्गारकेषु शङ्खालुकस्य पचनं कृत्वा जठरानलस्य शान्तिं विहितवान्। अतः उचितानुचितं किमिति विचिन्त्य महाकविः लोकव्यवहारमपि सूचयति। यदि मनुष्यः एकाकी भवति तर्हि सः स्वकर्मणः स्वयमेव साक्षी, स एव वक्ता, स एव श्रोता च भवति। तदुक्तम् –

**चेदेकलो भवति तर्हि जनः स साक्षी भोक्ता स एव खलु वक्ति शृणोति चैकः।**

**मायावृतोऽपि भगवान् स विमाय एतद्विश्वं विमाय हि वशी विवशत्वमेति।।**[13]

असारस्य संसारस्य विवशतां परिहर्तुकामाः यतयः परमपदं प्राप्तुं सर्वदा यत्नवन्तः भवन्तीति सः ब्राह्मणः चिन्तितवान्। तस्मिन् क्षणे तस्य मनसि गृहिणी स्मृतिपथम् आगता। सा तदानीं तत्र गन्तुं निवारयन्तीव सः अनुभूतवान्।

किन्तु क्षुधावशात् पत्नीप्रसङ्गं विस्मृत्य सलवणं शङ्खालुकं भूक्त्वा भूमौ शयनमकरोत्। प्रातः उत्थाय सकलवृत्तं भावयित्वा विप्रः विपद्ग्रस्तः भवति चेत् चाण्डालवत् चिक्त्वा विधिं न जानातीति अचिन्तयत्।यदि उदरपूर्तिः न भवति, तर्हि का कथा वेदाध्ययनस्य यदि अर्थद्वारा एव धर्मकामौ, सिद्धः तर्हि धर्मस्य महिमा लघीयान् भवति। अर्थात् धनं विना कथं वा लोकवृत्तमिति महाकवेरभिप्रायः।अस्मिन् खण्डकाव्ये महाकविः वच्चूलालः आपद्धर्मविषये सावधानं परिलक्षते। तदर्थमाह –

**आपद्गतस्य दुरितान्यपि यानि तानि श्रेयः प्रवाहविभवे विभलीभवन्ति।**

**भ्रान्तिं विदंस्तदनुगं भजते न दोषं गङ्गां समेत्य विमलैव हि कर्मनाशा।।**[14]

महाकविः अस्मिन् खण्डकाव्ये स्पष्टतया प्रदर्शयति यथा शरीरं विना धर्मपालनं न सम्भवति। महाकवेः कालिदासस्य, **शरीरमाद्यं खलु धर्मसाधनम्** इत्युक्तेः प्रभावोऽप्यत्र दृश्यते। तत्र पापप्रदुषितं जीवनं स्वानेन पवित्रं कर्तुं सः ब्राह्मणः शिप्रानदीं प्रति गन्तुमुद्यतः। स्नानं कृत्वा श्मशानाग्निनिकटं स्थितः अचिन्तयत् –

**एका चितैव बहुधा धृतविभह्मवेषा शीतात् क्षुधश्च वृजिनात् सदयं ररक्ष।**

**मेध्यं कदा भवति किं किमु वा न मेध्यं निर्णायकाविह परं बत देशकालौ।।**[15]

अर्थात् मनुष्यः परिस्थितेः दासः इति पद्यादस्मात् ज्ञायते। ततः भवदत्तः सन्ध्यावन्दनादिकं विहाय पुरतः महाकालेश्वरस्य उज्जयिनीं नगरीं ददर्श। तत्र सः ब्राह्मणः सिद्धवनतटनिकटे गत्वा कालीं क्रमशः श्रीभैरवं च प्रणतवान्। इयमेव काली कविकुलगुरुं कालिदासं प्रति कृपा कृतवती।

अतः सः ब्राह्मणः महाकालेश्वरस्य दर्शनाय अगात्। तत्र अवन्त्यां माध्यन्दिनशाखाध्यायिनां ब्राह्मणानां वेदपाठस्य दुर्द्दशां महाकविः वर्णयति। अत्र चतुर्भिः पद्यै ब्राह्मणानां वृत्तान्तः सूचितः। भवदत्तः अग्रे गत्वा यागकार्यरतं स्वमित्रमपश्यत्।परन्तु सः तथा सम्भाषणं नैव अकरोत्।तदवसरे भवदत्तस्य शिष्यस्तत्र समुपस्थितः। सः गुरुं भवदत्तं प्रणिपत्य स्वगृहं नीत्वा सुमधुरभोज्यैः सत्कृतवान्। गुरोः विषादविषमां प्रवृत्तिं श्रुत्वा शिष्यः दुःखितः भवति। शिष्यमुखेन महाकविः याज्ञिकानां धृष्टतां वर्णयति –

**शब्देन याग इति देवतनुश्च शब्दो**
**देवक्रतू न भवतो यदि शब्दहानिः।**

ततः शिष्येण सह भवदत्तः गोशकटेन स्वग्रामः प्रस्थितः बहुदिनात्परं प्रियशिष्यं विलोक्य भवदत्तस्य पत्नी आनन्दिता भवति।अतः

भवदत्तस्य भार्याः सर्वेषां कृते दिव्यभोजनं प्रदत्तवती। ततः गुरुं प्रति भक्त्या शिष्यः प्रणिपातमकरोत्। गुरुपुत्रस्य कृते कृषेरनुगुणं क्षेत्रं, धेनुद्वयं पर्याप्तं सुवर्णं शकटं च प्रदाय निवृत्तकृत्य ततः प्रतिगन्तुं निश्चितवान्। गुरुः शिष्येण प्रदतं धनं दृष्ट्वा चिन्तयति –

**काले कलत्रयममरत्वमिव प्रसूते काले तनूज-जनुषापि जरीहृषीति।**

**काले धनानि च यशांसि जनो वृणीते काले गते तदखिलं मृगतृष्णिकैव।।**[16]

संसारे सर्वमनित्यम्। भगवान् महाकालेश्वर एव सर्वसुखप्रदायकः। अतः भवदत्तः तापसवृत्त्या अवन्तीपुरे शेषजीवनं यापयितुमभिलषितवान्। ततः शुभमुहुर्ते तस्य नप्ता अभवत्। नप्तुर्मुखं दृष्ट्वा सः प्रीतः। मासात् परं गृहस्थकृत्यं सम्पाद्य जायया सह भवदत्तः गृहं परित्यज्य अवन्तीपुरे सिद्धवटस्य मूले स्वाध्यायशिक्षणपरः तपश्चचकार। तत्र शिप्रानदी सुशीतलपवनेन तस्य स्वागतं चकार। स एव भगवान् महाकालेश्वरः अगतिकानां गतिकः नित्यं मङ्गलं विदधतु इति महाकविः समुद्घोषयति।

**खण्डकाव्ये सामाजिकचिन्तनम्-**

मनुष्य एक समाजवद्धजीवः भवति। समाजं विना सः जीवितुं न शक्नोति। समाजः नाम् समानधर्मस्थानं समुदायः इति। तस्मात् छात्रसमाजः शिक्षकसमाजः कृषकसमाज इत्यादि व्यवहारः प्रवर्तते। समाजस्य चित्रं साहित्ये प्रतिफलितं भवति। साहित्यं च समाजस्य दर्पणः भवति। इति कथ्यते। यथा स्वच्छे, निर्मले, दर्पणे, कश्चित् स्वकीयां प्रतिकृतिं द्रष्टुं शक्नोति, तथैव सशस्ते साहित्ये तदानीन्तनसमाजस्य समुचितं चित्रं द्रष्टुं शक्यते।

सर्वत्रैव साहित्ये समाजस्य व्यावहाराः निरूपयन्ते तथा च सामाजिकविचाराणां चर्चा विधीयते। कविविरचितग्रन्थविशेषं विलोक्य काव्यरचनाकालिकाः सामाजिकस्य स्थिततः तात्कलिकाः सामाजिकचिन्तमयपरम्पराश्च विज्ञातुं शक्यन्ते। विषयाश्च चर्चावसरे सर्वत्र प्रथमं संस्कृतसाहित्यत्थोः सम्बन्धो विचार्यते।

संस्कृतिसामाजिकानां व्यवहारविशेषाणां समष्टिः हि वर्तते, साहित्यन्तु तेषां संस्कृतिकपदवाच्यानां मानवव्यवहारविशेषाणां चिरस्तायिनी मानवव्यवहारविशेषाणां चिरस्थायिनी कृतभिव्यक्तिविद्यते। तत्र सम उपसर्गपूर्वकात् कृ धातोः भावार्थे क्तिन् प्रत्यये कृते सति सम्परिभ्यां करौतौ भूषणे (6/2/237) इति सूत्रेण सुडि संस्कृतशब्दस्य निष्पत्तिर्भवति। भूषणात्मिका सम्यक् कृतिः संस्कृतिः एवञ्च "साहित्यस्य भावः साहित्यम्" इति निर्दिशन्तः शब्दशास्त्रविशारदाः परकाशितवन्तो यद्धि सहितशाब्दात् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (5.2.124) इति सूत्रेण ष्यञ् प्रत्ययकृते सति साहित्य शब्दो निष्पन्नो भवति। संस्कृतसाहित्यसम्बन्धोविषयकचर्चा प्रसङ्गे संस्कृतसाहित्यस्य च विभिन्नानां तत्वानां तथा साङ्गोपाङ्गानां परिचयस्यापेक्षा भवति। साहित्यस्य तत्त्वानां तु चर्चा पूर्वेष्वध्यायेषु कृतास्ति। सम्प्रति अवस्थी वच्चूलालः प्रणीतस्य "अगतिकगतिकम्" इति खण्डकाव्ये सामाजिकतत्वस्य बीजम् कीदृशं आसीत् तत् निरूपयामः।

खण्डकाव्यस्य **अगतिकगतिकम्** इति नाम्ना एव समाजस्य अवस्थायाः स्वरूपं किञ्चिदनुमातुं शक्यते। ततश्च कविना काव्यमिदं केवलं संसारे विरक्तानां जनानां कृते एव, तच्च ज्ञापयति स्वयं काव्ये यथा –

**संसाररीतिरखिलापि मृषेति कृत्वा निह्नूयतामिति यतः स्फुरति प्रयासः।**

**तस्माद् विषाक्तमनसां प्रतिबोधनाय प्रस्तूयते विशद एष कथाप्रसङ्गः।।**[17]

एतेन ज्ञायते तदा समाजे अतीवतया दारिद्रता आसीत्। तथा च जनाः ततः मुक्तिम् इच्छन्तः विचरन्तः स्म। भवदत्तनाम्ना चरित्रेण कविना स्वीये खण्डकाव्ये तदानीन्तसमकालीकं समाजचित्रं लेखणीकौशल्यां प्रस्फूटितम्।

**1. आर्थिकव्यवस्था -**

पूर्वमेवोक्तं समाजः दारिद्रे अपवृतः आसीत्। दारिद्रतायाः स्वरूपविचारे मृच्छकटिके आह—

**शून्यमपुत्रस्य गृहं चिरशुन्यं नास्ति यस्य सन्मित्रम्।**

**मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ।**[18]

अर्थात् दारिद्रं तस्मात्पुरुषात् सर्वं स्वीकृत्य शून्यत्वेन प्रतिष्ठापयति। तेन समाजे स घृणपात्रत्वेन तिष्ठति। तथा च कश्चिदस्य सङ्गं नैव ह कुरुते, आदरात् न संभाषते कोऽपि , उत्सवेषु विभववतां सदनं संप्राप्य सावज्ञम् आलोक्यते तदा अल्पच्छदः दरिद्रः लज्जया महाजनस्य दूरात् एव विहरति। अत एव मृच्छकटिके वदति -

**मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्।**[19]

दारिद्रजन् दृष्ट्वा बान्धवजनाः वाक्ये न तिष्ठते। प्रीतिपूरिताः सुहृदः विमुखीं भवन्ति। तदैवाह कविना स्वयम् –

**सम्बन्धिनोऽपि सुहृदोऽपि च पश्यतो मे तूर्णीं विलोक्य मिषतो रहयन्ति गेहम्।**

**मानोन्नतं विदलर्तिं किल काण्डशेषं, सौगन्धिकं न समया भ्रमरा भ्रमन्ति।।**[20]

अर्थरूपनिर्धनत्वे सत्वेऽपि यस्य समीपे ज्ञानरूपं धनं तिष्ठति स निर्धनः न भवति।

ज्ञानमेव श्रेष्ठं धनम् इति सर्वत्र व्यवहारः।ज्ञानद्वारैव सर्वत्र स पूज्यते। तेन सर्वं नूतनतया सर्वं स्रष्टुं पारयति। यथा काव्येऽस्मिन्नाह-

**आयाति याति चपला चपलेव लक्ष्मीस्तां लौकिका विमतयो बहु मानयन्ति।**

**ये छान्दसे महिमनि प्रतिभानभाजो नादीनवं सृजति तान् प्रति निर्धनत्वम्।**[21]

अन्यत्र कविना सन्तोषमेव परमं धनम् इति आख्यातम्। संन्तोषश्च क्रोधेर्ष्यालोभत्यागात् आयाति। तच्चाह कविना-

**सन्तोष एव परमं धनमित्यमंस्थाः।**[22]

धनेन न सर्वं भवति। धनीनां तु यागादौ न स्थानं भवति। तदार्थं तु पुरोहिता स्युः। अर्थात् कविना धनं केवलं निमित्तमात्रं भवति, न तु धर्मोपयोगित्वमस्ति। तदेवाह-

**पुण्यालये प्रसरणं धनतस्काराणां तीर्थे मनोज्ञवनितानन्नलोलुपानाम्।**

**देवलये कपटिनां खलदेवालानां यागे त एव यजमानपुरोहिताः स्युः।।**[23]

भगवान् धनीनां गृहेषु वन्दिकृतः भवति। किञ्च तेषां कारणादेव सूर्यः भयेन समयं विधत्ते। अतः वेदज्ञः एव सर्वोत्तमः अस्ति। ये तु स्वधर्मे निरताः भवन्ति, ते च निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति।

**2. समाजे पुरुषव्यवस्था---**

समाजः साधारणतः पुरुषतान्त्रिको भवति। समाजे वर्णाश्रमप्रथा अचिरेण प्रवाहमाणः आसीत्। तत्र ब्राह्मणाः कथमासीत् तद् खण्डकाव्येऽस्मिन् भवदत्तनाम्नः नायकस्य जीवनचरितेन ज्ञायते। ब्राह्मणस्य नित्यकर्मविषये मनुस्मृतौ वदति –

**अध्यापनमध्ययनं यजनं याजनं तथा।**

**दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।**[24]

तद्वद् स भवदत्तः वेदाध्ययानरूपाणि नित्यनैमित्तिककर्माणि प्रतिदिनं करोति स्म। स सर्वदा शालीनभावनिरत आसीत्, वितर्कात् विरतो आसीत्। प्रत्यहं ब्राह्मे मुहूर्ते उत्थाय यथाविधानं ब्राह्मणनित्यकर्म करोति स्म। तस्य अध्यपनादिभिः सर्वदा निरतः आसीत्। तस्मिन् धनविषये रूचिर्नासीत्। स प्रयोजननियोजनमात्रवृत्यर्थं यावद् अपेक्षितं तावदेव स्वीकरोति। यथोक्तम्-

**अध्यापनाभिररचिरावथियाजनाभिर्दैनप्रयोजननियोजनमात्रवृत्तिः। त्यक्तप्रतिग्रहधनो भवदत्तभावोमेने तृणाय धनदं भवदत्तशर्मा।।**

स यागकार्ये अपि कुशल आसीत्। तदैवाह- **यागः प्रयागः इव पण्डितमाचकर्षः। इति।** ये तु स्वधर्मे निरताः भवन्ति, ते च निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति इति पूर्वोक्तात् वाक्यात् ज्ञातुं शक्यते सर्वे व्यक्तयः स्वधर्मे सुस्थिताः आसन्। येन समाजे धनविषयकेप्सा एव नासीत्।

यौवनसम्पन्नः भवदत्तस्य पुत्रोऽपि श्रुतपारदृश्वा आसीत्। गोपालनमपि स कोरति।

**3. गुरुशिष्यपरम्परा--**

समाजे शिक्षायाः महत्वं तु प्रमुखं भजते। पूर्वकाले तु अध्यायनविषये ब्राह्मणक्षत्रियाणामेव स्वीकृतिः आसीत्। एवञ्च अध्यापनकार्यं केवलं ब्राह्मणानामेवासीत्। पूर्वकाले शिक्षाव्यवस्था गुरुशिष्यपरम्परया भवति स्म। तद्विषये यथा चानक्यनीतेः -

**राजा राष्ट्रकृतं पापं राज्ञः पापं पुरोहितः ।**
**भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुस्तथा ।।**[25]

अपि च हितोपदेशे -

**पुस्तकेषु च नाधीतं नाधीतं गुरुसन्निधौ ।**
**न शोभते सम्भामध्ये जारगर्भ इव स्त्रियाः।।**[26]

काव्ये भवदत्तस्य अपि शिष्य आसीत् इति ज्ञायते। तद्यथा-

**यां दक्षिणां किल गुरुं प्रति भक्तिवित्तः शिष्यो न निर्धनतायार्पयितुं शशाक।**[27]

श्लौकाज्ज्ञायते स शिष्यः गुरुभक्तिपरायण आसीत्।

**4. समाजे धर्मव्यवस्था--**

वर्णाक्रमानुसारं धर्माः चतुर्विधाः इति वक्तुं शक्यते। ब्राह्मणानां धर्मो य़था कविना भवदत्तस्य जीवनचरितात् कथम् इति ज्ञायते। यः स्वं स्वं धर्ममाचरति स श्रेष्ठः भवति। यस्तु तद्विहाय चलति स नरके पतितो भवति। यथोक्तम्-

**आजन्मनश्चरितधर्मपथाच्च्युतस्य स्यादेवनाम नरकाय चिराय पापम्।**[28]

धर्माद् विचलिताः भवन्ति पुनः तद्वत्साध्यम् अर्थेन न प्राप्यते। अतः अधार्मिका विषये आह-

**अधार्मिको भवति नाम चरन्नधर्मं धर्मः सनातनः इति प्रवदन्ति सन्तः। अर्थेन हन्त यदि साध्यते एष धर्मो धर्मस्थितिर्भवतु कार्थसमुज्झितानाम्।।**[29]

अत एव आह सन्तोषमेव परमं धनम् इति आख्यातम्। संन्तोषश्च क्रोधेर्ष्यालोभत्यागात् आयाति। तच्चाह कविना-

**सन्तोष एव परमं धनमित्यमंस्थाः।**

भगवान् धनीनां गृहेषु वन्दिकृतः भवति। किञ्च तेषां कारणादेव सूर्यः भयेन समयं विधत्ते। अतः वेदज्ञः एव सर्वोत्तमः अस्ति। ये तु स्वधर्मे निरताः भवन्ति, ते च निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति। धनेन न सर्वं भवति। धनीनां तु यागादौ न स्थानं भवति। तदार्थं तु पुरोहिता स्युः। अर्थात् कविना धनं केवलं निमित्तमात्रं भवति, न तु धर्मोपयोगित्वमस्ति। तदेवाह-

**पुण्यालये प्रसरणं धनतस्काराणां तीर्थे मनोज्ञवनितानलोलुपानाम्। देवलये कपटिनां खलदेवालानां यागे त एव यजमानपुरोहिताः स्युः।**[30]

**सहायकग्रन्थसूची**


1. कविचिन्तामणिः, ड. नारायणमहापालः, लोकभाषाप्रचारसमितिः, पुरी, 1998
2. दण्डी, काव्यादर्शः, एस्. विश्वनाथन्, श्रीबालमनोरमा प्रेस, पुरी।
3. मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी (221001 यू.पी), जुलाई, 2016
4. भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002
5. आनन्दवर्धनः, ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्यभवन, वाराणसी, संस्करणम् – 2001
6. अवस्थीबच्चूलालः, प्रतानिनी, श्री मिश्रीभिराजराजेन्द्रः, वैजयन्त प्रकाशन, इलाहाबाद – 1996
7. विश्वनाथः, साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013


**पाद टिप्पणी –**

1. साहित्यदर्पणः ६/२
2. अग्निपुराणम् ३३६/११
3. साहित्यदर्पणः ६/३२९
4. कविः चिन्तामणिः ४/१
5. प्रतानिनी, पृ. १३
6. अगतिकगतिकम् १
7. अगतिकगतिकम् ३
8. अगतिकगतिकम् ४
9. अगतिकगतिकम् १२
10. अगतिकगतिकम् १९
11. अगतिकगतिकम् २२
12. अगतिकगतिकम् २५
13. अगतिकगतिकम् ८४
14. अगतिकगतिकम् ९९
15. अगतिकगतिकम् १०४
16. अगतिकगतिकम् १४५
17. अगतिकगतिकम् ३
18. मृच्छकटिकम् १/८
19. मृच्छकटिकम् २/६
20. अगतिकगतिकम् १७
21. अगतिकगतिकम् ६
22. अगतिकगतिकम् २०
23. अगतिकगतिकम् २३
24. मनुस्मृतिः १/८८
25. चानक्यनीति ६/१०
26. हितोपदेशः १०/११
27. अगतिकगतिकम् १४०
28. अगतिकगतिकम् ९१
29. अगतिकगतिकम् ९०
30. अगतिकगतिकम् २३